Lesson 61.

# Swara Sandhi and Visarga Sandhi.

## स्वरसन्धिः / विसर्गसन्धिः

In my early days of enthusiastic Sanskrit studies, I picked up the Panchatantra to 'improve' my language skills. One look at the text… a long never ending word that filled 25 lines (if I exaggerate, it is only for effect….believe me, I do not lie. Ever.) and I figured that I had to get my Sandhi rules firmly understood first.
Sandhi is the joining of two words into a single word. The last letter of a word and the first letter of the adjoining word form one letter.
Sandhi-vicheda, सन्धिविच्छेदः, describes the process by which one letter ( whether single or cojoined) is broken to form two words. Part of the broken letter remains as the last letter of the first word and part of the letter forms the first letter of the next letter.
Over time I still find it easier to break words than to join them but here are a few tips that have kept me in good stead either way:

1. Sandhis take place whenever there is a presence of a swara….a vowel ; the presence of a consonant WITH a halanta ( for example क् ); the presence of a visarga (for example कः )
2. Siren's on!! Trip up alert:

Whenever I see a य, व, ए, ऐ, ओ, औ, स्, श्, ष्, र् , ऽ in a "more or less" long word, my antennae go up. Chances are that I have a Sandhi staring at me in the face. I always potter around these letters to help me decide whether the occasion has presented itself to break two words.

The more I read, the more I was convinced that there were a trillion sandhi rules to follow. But ever so slowly it began to filter in that amongst those trillion rules a few are oft repeated and they are the only ones that one need really remember to follow Sanskrit classical texts. Buy a book that lists all sandhi rules so that you can refer to it if you come across an occasional sandhi that I have not dealt with. But for all practical purposes, these are enough. Lesson 61 will deal with 1) a revision of swara sandhi rules plus a few more new ones AND 2) with visarga sandhi rules. A tabular column works well for reference.

Swar Sandhi.

| The name of the sandhi | The first word should end in: | The second word should begin with: | Result of the sandhi | Example |
|---|---|---|---|---|
| १. दीर्घ सन्धि | अ or आ | अ or आ | आ | हिम + आलय: =हिमालय: । विद्या + अर्थी =विद्यार्थी । |
| | इ or ई | इ or ई | ई | कवि + इन्द्र: = कवीन्द्र: । श्री + ईश: =श्रीश: । |
| | उ or ऊ | उ or ऊ | ऊ | भानु + उदय: = भानूदय: ।. वधू + उदय: = वधूदय: । |
| | | | | |
| २. गुण सन्धि | अ or आ | इ or ई | ए | सुर + ईश: = सुरेश:। रमा + ईश: = रमेश: । |
| | अ or आ | उ or ऊ | ओ | सूर्य + उदय = सूर्योदय । गङ्गा + उर्मि = गङ्गोर्मि: । |
| | अ or आ | ऋ or ॠ | अर् | महा + ऋषि: = महर्षि: । |
| | अ or आ | ऌ | अल् | तव + ऌकार: = तवल्कार: । |

| | | | | |
|---|---|---|---|---|
| ३. वृद्धि सन्धि | अ or आ | ए or ऐ | ऐ | मम + एकः = ममैकः। दैव + ऐश्वर्यम् =दैवैश्वर्यम् । |
| | अ or आ | ओ or औ | औ | उष्ण + ओदनम् = उष्णौदनम् । महा + औषधम् = महौषधम् । |
| | अ or आ ( उपसर्ग a prefix ) | ऋ or ॠ | आर् | उप + ऋच्छति ( to go, to become difficult ) = उपार्च्छति । |
| | अ or आ ( उपसर्ग a prefix) | ऌ | आल् | उप + ऌकारः = उपाल्कारः । |
| | | | | |
| ४. यण् सन्धि | इ or ई | vowel that is not an इ or ई | य् | इति + आदि= इत्यादि। |
| | उ or ऊ | vowel that is not an उ or ऊ | व् | वधू + आगता= वध्वागता। |
| | ऋ or ॠ | vowel that is not an ऋ or ॠ | र् | पितृ + आज्ञा = पित्राज्ञा |
| | ऌ | vowel that is not ऌ | ल् | ऌ + आकृति = लाकृति । |
| | | | | |
| ५. अयादि | ए | any vowel (except for | अय् | हरे + ए |

| | | | | |
|---|---|---|---|---|
| सन्धि | | अ if the ए ending is that of a declined noun. | | =हरये । वर्तन्ते + इति = वर्तन्तयिति / वर्तन्त इति |
| | ऐ | any vowel | आय् | नै + अक: = नायक: । तस्मै + अपि = तस्मायपि / तस्मा अपि । |
| | ओ | any vowel (except for अ if the ओ ending is that of a declined noun. | अव् | पो+ अन: = पवन: । भानो + इदम् = भानविदम् / भान इदम् |
| | औ | any vowel | आव् | पौ + अक: = पावक:। उभौ + अपि = उभावपि / उभा अपि |
| | | | | |
| ६. पूर्वरूप सन्धि | A declined noun ending in an ए or an ओ | अ | ऽ instead of अ | कवये +अत्र= कवयेऽत्र । साधो +अत्र = साधोऽत्र । |
| | | | | |
| ७. पररूप सन्धि | a prefix ending in an अ | a conjugated verb beginning with an ए or an ओ | अ is elided. | अव + एहि =अवेहि। उप +ओषति =उपोषति। |

| | | | | |
|---|---|---|---|---|
| ८. प्रकृतिभाव सन्धि | द्विवचन words ending in ई, ऊ , ए | द्विवचन word where its first letter is a vowel. | Sandhi does not take place | कवी + एतौ =कवी एतौ<br>गुरू + इमौ =गुरू इमौ |
| | Indeclinables (अव्ययs) ending in an an आ or an ओ | vowel | Sandhi does not take place | अहो अत्र भावन्<br>आ एवं नु मन्यसे |

I came across very peculiar sandhis during the course of my study. Unfortunately, I have not been able to find a rule in grammar texts that authenticates such sandhis. However, I'll place them before you and if you do come across references regarding this please let me know so that I may share it with others.

1. Words that end in अ/आ and when combined with words beginning with अ/आ have sometimes been written like this:

तथा + अपि = तथाऽपि

तत्र + अपि =तत्राऽपि

तुष्टा +अत्र= तुष्टाऽत्र

2. The occurrence of two अवग्रहचिह्न s ( ऽऽ ) together tell you that an आ is present at that point.

Visarga Sandhi:

Before we do the Visarga Sandhi, it is important to have a table that differentiates the soft consonants from the hard ones.

| | | | | |
|---|---|---|---|---|
| क् | ख् | ग् | घ् | ङ् |
| च् | छ् | ज् | झ् | ञ् |
| ट् | ठ् | ड् | ढ् | ण् |
| त् | थ् | द् | ध् | न् |
| प् | फ् | ब् | भ् | म् |
| | | | | |
| य् | र् | ल् | व् | |
| श् | ष् | स् | ह् | |

The shaded consonants are the कठोर-व्यञ्जनानि - hard consonants.

The rest are मृदु–व्यञ्जनानि - soft consonants.

The following table should be helpful

| visarga | preceded by | followed by | results in |
|---|---|---|---|
| | अ | any soft consonant OR अ | coalesces into ओ (for a soft consonant) ORओऽ (for an अ) कः + अपि = कोऽपि । |
| | An indeclinable (अव्यय) ending in anअ | any vowel OR any soft consonant except for र | is replaced by र् पुनः + अत्र = पुनरत्र । पुनः + गच्छति = पुनर्गच्छति । |
| | An indeclinable (अव्यय) ending in anअ | र | visarga is dropped and the अ becomes आ पुनः + रमते = पुना रमते । |
| | The vocative case, सम्बोधन, of a ऋ | any vowel OR any soft consonant | changes to र् |

| | | | |
|---|---|---|---|
| | ending noun | | पितः + वन्दे = पितर्वन्दे । |
| | अ | any vowel except अ | is elided<br>कः + उवाच = क उवाच । |
| | | | |
| | आ | any vowel OR any soft consonant | is elided<br>बालाः + अत्र = बाला अत्र ।<br>ताः + गच्छन्ति = ता गच्छन्ति । |
| | any vowel except अ, आ | any vowel OR any soft consonant except र् | changes into र्<br>मुनिः + इति = मुनिरिति । |
| | any short vowel except अ | र | the short vowel becomes long<br>भूपतिः + राजते = भूपती राजते । |
| | any vowel | च् , छ् ,<br>ट् , ठ् ,<br>त् , थ्<br>श् , ष् , स् | changes into<br>श् ,<br>ष् ,<br>स् ।<br>श् , ष् , स् । |
| | अ | क् , प् | स्<br>नमः + करोति = नमस्करोति ।<br>पुरस्करोति । |
| एषः/ सः | | Any consonant or vowel except for अ | elision of the visarga.<br>स गच्छति । |

| Name of the sandhi | visarga preceded by | followed by | effect | example |
|---|---|---|---|---|
| १.उत्व | अः | र | ओर | मनः + रथः = मनोरथः। |
| | अः | लि | ओ लि | कः + लिखति = को लिखति । |
| | अः | व | ओ व | छात्रः + वदति = छात्रो वदति । |
| | अः | ग | ओ ग | यशः + गानम् = यशो गानम् । |
| | अः | ध | ओ ध | तेजः + धनम् = तेजो धनम् । |
| | अः | अ | ओ ऽ | कः + अपि = कोऽपि ।<br>सः + अपि = सोऽपि । |
| | | | | |
| २. सत्व | अः | त् | अस्त् | नमः + ते = नमस्ते । |
| | अः | ट् | अष्ट् | रामः + टीकते = रामष्टीकते । |
| | अः | च् | अश्च | कः + चित् = कश्चित् । |
| | | | | |
| ३. रुत्व | उः | अ | उर् अ | भानुः + अयम् = भानुरयम् । |
| | उः | ह | उर्ह | शत्रुः + हन्ति = शत्रुर्हन्ति । |
| | इः | ग | इर्ग | मुनिः + गतः = मुनिर्गतः । |
| | | | | |
| ४. लोप | अः | आ | अ आ | मोहनः + आगच्छति = मोहन आगच्छति । |
| | अः | इ | अ इ | रामः + इच्छति = राम इच्छति । |
| | अः | उ | अ उ | कः + उवाच = क उवाच । |
| | आः | आ | आ आ | नराः + आयान्ति = नरा आयान्ति ।<br>बालाः + आगच्छान्ति = बाला आगच्छन्ति । |
| | आः | ग | आ ग | देवाः + गच्छन्ति = देवा गच्छन्ति । |

Lesson 61 A B C

Faith in the Guru

I've dared to label this lesson 61 ABC because it incorporates a story and a set of exercises for you as well. To make things easier, I've marked the sandhis bold. Please try and break the sandhis.

गुरौ निष्ठा ।

भद्रदायिनी नाम **सरितस्तीरयासीतेक आश्रमः** । **तत्राङ्गिरा नामाचार्यो निवसति** स्म । आश्रमस्य **परिसरोऽत्यन्तः मनोहार्यासीत्** । ईदृशं शान्तं रमणीयं वातावरणं वेदाध्ययनाय युक्तमासीत् । अनेके **विद्यार्थिनस्तत्राध्ययनस्य हेतोर्निवसन्ति** स्म । ते **अङ्गिरसो वेदान् शास्त्राण्युपनिषदान्** च पठन्ति स्म । तेषां शशी, देवनन्दी, अज्ञजयी च मेधाविनः । त्रयोऽपि वेदेषु , शास्त्रेषु च निपुणाः ।

**एकदाङ्गिरास्तानाहूयोक्तवान्** भवतां विद्यागमं **दृष्ट्वाहं** प्रसन्नः । **अतोऽग्राभ्यासाय** मया **भवन्तो वृताः** । किन्तु यदि **काश्चन सिद्धयो लब्धव्यास्तर्हि** मया निर्दिष्टं कार्यं **करणीयमिति** । **त्रिभिर्विद्यार्थिभिः अन्वमन्यत** । **आचार्यस्तेभ्यस्त्रीन्** लघून् **कलशानयच्छत्** तान् **चाश्रमस्य** पार्श्वस्थस्य गिरेः **शिखरमनयत्** । तत्र भूमौ त्रीन् **वर्तुलानालिख्य तेभ्यो एकैकं** स्थानं दत्तम् । **हिमालयातागतात्** कस्माच्चित् सन्यासिनः मया कानिचन बीजानि लब्धानि ।तानि **मयात्र** वपितानि । **प्रतिदिनमुषसि** भवद्भिः सरितः **पय आनीय** आत्मनः **स्थानमष्टाधिकशतेन** पूर्णकलशैः सेक्तव्यम् । यदि अङ्कुरा रोहिष्यन्ति तदा मह्यं सूचना दातव्या **इत्युक्त्वाङ्गिराः** ततः प्रस्थितः । **गुरोराज्ञा** पालितव्या । अतः **परेद्युरेव** त्रिभिः स्वस्थानस्य **सिञ्चनमारब्धम्** । **दिनान्यतीतानि** । यद्यपि नियमानुसारसेचनं कृतं **तथाप्येकोऽप्यङ्कुरो न दृष्टः** । विद्यार्थिनां मनसि शङ्का जाता ।गुरुणायोग्यं स्थानं न दत्तं स्यात् ।अत्र बीजानि सन्ति खलु? अज्ञजयिना चिन्तितं यत् गुरुः न शङ्कनीयः । अतः सः स्वकार्यात् न विरतः । किन्तु शशी देवनन्दी **चाङ्गिरसं निकषागच्छतां** तं **चापृच्छतां,** षट् **मासाभवन्** । **भवतो निर्देशानुसारं** वयं प्रतिदिनं स्वस्थानं पयसा सिञ्चामः । किन्तु तत्र रोपस्य **लक्षणमपि नास्तीति** । अङ्गिराः शान्तचेतसा तौ श्रुतवान् । सस्मितं **स उक्तवान् , बुद्धिमतो**

**विद्यार्थिन ईदृश्यपेक्षा नासीत्** इति । तदनन्तरं तेन तस्मात् अधिकं साहाय्यं न दत्तम् । शशिना निश्चय: कृत: यत् अधिकेन श्रमेण किं प्रयोजनम् । श्व: **प्रभृत्यहं** क्षेत्रे **पयो न निपतिष्यामीति** । देवनन्दी किञ्चित् **क्षम्यासीत्** । अत इतोऽपि कालार्थं तेन **गुरोराज्ञा** पालिता । अत्रान्तरे गुरुणा किमपि नूतनं
**नाध्यापितम्** । एतस्मात् कारणात् **शश्याश्रमात्** निर्गत: ।
द्वे **वर्षेऽभवताम्** । इदानीं **देवनन्द्यप्याशङ्कितोऽभवत्** ।अद्य यावत् किमपि बीजं वर्धितव्यम् ।अधिकेन पयसा **बीजमेव** मृतं स्यात् इति **सोऽचिन्तयत्** । शनै: शनै: तस्य **सेचनकार्यमनियतं** जातम् । **चतुर्भ्यो वर्षेभ्योऽनन्तरं देवनन्दिनापि प्रस्थानस्येच्छा** प्रकटीकृता । **अङ्गिरसानुज्ञा** दत्ता ।
**अज्ञजयिनस्तु** साधना नियमानुसारिणी **प्रवर्तमानासीत्** । धृतिमान् स: प्रतिदिनं **ब्रह्ममुहूर्तयुत्थाय** सूर्योदयात् **प्राकष्टाधिकशतवारं** भद्रदायिन्या: सरित: **पयो गृहीत्वा** गिरिमारुह्य बीजानां सेचनं करोति स्म । ईदृशं **द्वादशवर्षाण्यतीतानि** । एकस्मिन् दिने तेन एको हरित् **बिन्दुर्दृष्ट:**। ईषत् **कालानन्तरमेक: पालवो भूम्या आरोहत्** । तं **दृष्ट्वाज्ञजयिनश्चक्षुर्भ्यामश्रुधारा** प्रसृता । झटिति **तेनाङ्गिरसे** शुभवार्ता कथिता । अङ्गिरा: उक्तवान् सा एका **विशिष्टौषधि:** ( special herb)अस्ति या अनेकान् रोगान् निवारयति । सा **द्वादशभ्यो वर्षेभ्योऽनन्तरं** प्ररोहति । अपि तु **तस्या बीजानि** सावधानं रक्षितव्यानि पोषितव्यानि च । **तथाप्यस्मासु** सिद्धिप्राप्ति: सम्भवनीया । तस्या: कृते तु गुरौ निष्ठा **स्थापनीयाविरतसाधना** च कर्तव्या । अचिरात् फलं न प्राप्यते । अस्माभि: तु **प्रयत्नो न** त्यक्तव्य: । यदा गुरुकृपा भवति तदा फलमवश्यं **लभ्यत इति** ।